**1D** the state of being syntactically related or construed 'संपद्यत' इत्यस्य पदस्य सर्वत्र संयोगबोधकतयैवान्वितत्वात् VedāntKau. 406.3 (*on* iv.2.15); शाखान्तर-प्रकरणान्तरगतवाक्यानाम् ... ब्रह्मणि ... अन्वितत्वात् ŚivārkaMaDī. 518.29 (*on* i.4.7); शून्यपदस्याकार एवान्वितत्वेन हकारे शून्यत्वं न SetuBa. 190.26; **2** the state of being endowed naturally महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्यन्तम् एषां समुदायः सूक्ष्मशरीरं शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः SāṁkhyaTaKau. 394.5 (*on* 40); **3** the state of being continuous अन्वितत्वादेव सुखदुःखमोहात्मकं सामान्यम् VedāntKa. 251.1 (*on* ii.2.1).

**अन्वितत्वप्रतिपादन** (anvitatva-pratipādana) *n.* explanation of the state of being semantically related (meanings) न सर्वपदार्थानाम् अन्वितत्व-प्रतिपादनसामर्थ्यमुपकल्पयितुं शक्यते NyāyRaMā. 89.5.

**अन्वितत्ववपुस्** (anvitatva-vapus) *n.* (Inst.) in the form of being semantically related (meanings) योग्येतरान्विततया न च वाच्यतास्य कार्यान्वितत्ववपुषा सुतरां न चेष्टा। किं त्वन्वितत्ववपुषः न विशेषणस्य किंचित्प्रयोजकमिहास्ति निरूपणायाम् SaṁkṣeŚā. 1.369 (i.272.22)

**अन्वितत्वादि** (anvitatvādi) *adj.* the state of being continuous etc. सुखदुःखमोहात्मनान्वितत्वादेः साधनस्य साध्यविपर्ययव्याप्ततया विरुद्धत्वात् SarvaDaSaṁ. 16.3.

**अन्वितद्रवसिक्थका** (anvitadrava-sikthakā) *f.* boiled rice which is with gruel यवागूरुष्णिका श्राणा [यान्वितद्रव]सिक्थका ParyāRaMā. 68.1642.

**अन्वितधी** (anvita-dhī) *f.* (verbal) cognition of semantically related (meanings) प्रत्ययप्रकृतिशब्दयोः पुनर्नित्यमन्वितधियो निमित्तता SaṁkṣeŚā. 1.393 (i.292.5); श्वेतमध्यक्षं पश्यतः ... श्रृण्वतः खुरनिष्पेष(क्षेप)शब्दं च 'श्वेतोऽश्वो धावति' इत्यन्वितधियः पदश्रवणमन्तरेणोत्पादो दृष्ट इति चेत् TattvBi. 110.4; चतुरिन्द्रियसन्निपाते पश्यतः ... स्पृशतः ... 'आम्रो मधुरः शीतः सुरभिः' इत्यन्वितधीः NayaVi. 273.1 (*on* i.1.24)

**अन्वितपदार्थक** (anvitapadārtha-ka) *adj.* referring to the semantically related word-meaning अन्वितपदार्थकं वाक्यमनुपादेयम् NyāyMañ. i.7.6; यदि चान्वितपदार्थकपदैकदेशानुवृत्तिरिष्येत, ततो व्यर्थमेवेङ्ग्रहणं स्यात् PariVṛ. (Nī.) 10.10.

**अन्वितपदार्थत्व** (anvitapadārtha-tva) *n.* the state of being semantically related meanings नन्वन्वितपदार्थत्वाद्वाक्यार्थस्य पदार्थताम् BrahmSi. 156.5.

**अन्वितपदार्थधी** (anvitapadārtha-dhī) *f.* (verbal) cognition of semantically related word-meanings पदं हि प्रथमश्रुतं नान्वितपदार्थधीव्यावृत्त्या वाक्यार्थं बोधयति NayaVi. 187.1 (*on* i.3.5)

**अन्वितपदार्थप्रतिसंबन्धिन्** (anvitapadārtha-pratisambandhin) *adj.* having a relation with semantically related meanings अन्विते व्युत्पत्तेरन्वित-पदार्थप्रतिसंबन्धीनि पदानि TantrRaha. 35.10.

**अन्वितपदार्थविषय** (anvitapadārtha-viṣaya) *adj.* referring to the semantically related word-meanings सत्यमन्वितपदार्थविषयावेवावापोद्धारौ, तथाप्यन्विताभिधानमशक्यम् PrakaPañ. 383.14.

**अन्वितपदार्थस्मरण** (anvitapadārtha-smaraṇa) *n.* recollection of semantically related word-meanings पदोच्चारणानन्तरमनन्वितपदार्थस्मरणमुपपन्नम् TantrRaha. 35.17.

**अन्वितपदार्थाधीन** (anvitapadārthādhīna) *adj.* dependent on the semantically related word-meanings 'पदार्थेभ्यो वाक्यार्थः' इति भाष्येऽन्वयो निष्कर्षाद्वाक्यार्थ उक्तः सोऽन्वितपदार्थाधीनः NayaVi. 269.2 (*on* i.i.24)

**अन्वितपरता** (anvitapara-tā) *f.* [Inst.] by way of being what refers to the related (meanings) व्याख्यातं च भाष्यादिकमन्वितपरतया विवरणे श्रीराममिश्रैः NyāyPari. 372.3.

**अन्वितपरत्व** (anvitapara-tva) *n.* the state of being what refers to the related (meanings) कार्यान्वितपरत्वनियमाभावे पदानामतिलाघवायान्वितपरत्वमपि त्यज्यताम् VedāntKa. 81.21. (*on* i.1.4)

**अन्वितपर्यन्ता** (anvita-paryantā) *adj.* (*f.*) which extends up to the semantically related (meanings) एकैव तु शक्तिरन्वितपर्यन्ता कल्प्यते NyāyRaMā. 79.20; 82.1; पदानां वाक्यार्थाभिधानशक्तिरविवादा भवद्भिरङ्गीकारात्। ततश्च सैवान्वितपर्यन्ता स्वीकार्या TantrRaha. 33.19.

**अन्वितपर्यवसान** (anvita-paryavasāna) *n.* culmination into the semantically related (meanings) पदानाम् ... अन्वितपर्यवसाने च भट्टसंमतिमाह VedāntKa. 83.1 (*on* i.1.4)

**अन्वितप्रतिपत्ति** (anvita-pratipatti) *f.* knowledge of the semantically related (meanings) अन्वितार्थप्रतिपत्तिनिबन्धनश्च व्यवहारः, अतस्तद्दर्शनात्, अन्वित-प्रतिपत्तिरेवानुमातुं शक्या PrakaPañ. 406.17; अन्वितप्रतिपत्तिस्तु बाढमभ्युपगम्यते NyāyMañ. i.372.14; अर्थान्तरान्वयपरस्य स्वार्थमात्राभिधानेऽप्यन्वितप्रतिपत्तेः ... यावत्पदस्य सामर्थ्यमनुवर्तनीयम् TattvBi. 152.2; पदानामभिधेयं वरमाश्रितं तत्र अन्वितप्रतिपत्तेर्निर्मूलत्वप्रसङ्गात् NyāyRaMā. 79.2; यत्र तर्हि सर्वपदानामेव लाक्षणिकार्थत्वं न कस्यचिदपि मुख्योऽर्थो विद्यते तत्र कथमन्वितप्रतिपत्तिः NyāyRaMā. 88.2.

**अन्वितप्रतिपत्तिकारण** (anvitapratipatti-kāraṇa) *n.* cause of the knowledge of semantically related (meanings) अविदितमपि शब्दप्रतीतानामे-वार्थानामन्वितप्रतिपत्तिकारणत्वं कल्प्यते NyāRaMā. 79.13.

**अन्वितप्रतिपत्तिजनक** (anvitapratipatti-janaka) *adj.* producer of the knowledge of semantically related (meanings) यदयोग्यार्थं तदन्वितप्रतिपत्ति-जनकं न भवति TattvPradī. (Ci.) 68.7.

**अन्वितप्रतिपत्तिपर** (anvitapratipatti-para) *adj.* meant to produce the knowledge of semantically related (meanings) विवादपदानि पदानि, लक्षणया पदार्थानामन्योऽन्यान्वयप्रतिपत्तिपराणि, ... पदत्वात् ... पदकदम्बवत् TattvPradī. (Ci.) 154.11.

**अन्वितप्रतिपादक** (anvita-pratipādaka) *adj.* which produces the knowledge of semantically related (meanings) नावश्यमन्वितप्रतिपादकेनैव वाक्येन तद्विषयविज्ञानानुमानम् NyāyRaMā. 90.8; न चान्वितप्रतिपादकं वाक्यमुच्चारितमिति कथमन्वितज्ञानानुमानम् ŚāstrDī. 17.9 (*on* i.1.2)

**अन्वितप्रतिपादकत्व** (anvitapratipādaka-tva) *n.* the state of producing the knowledge of semantically related (meanings) तात्पर्यात्पदानामेव साक्षाद-न्वितप्रतिपादकत्वं युक्तम् NyāyRaMā. 85.21 अभिहितान्वयपक्षे पदार्थानामन्वित-प्रतिपादकत्वसामर्थ्यं क्लृप्तमेव NyāyRaMā. 96.4; अन्वितप्रतिपादकत्वनिमित्तमन्वय-प्रतिपादकत्वम् NyāyRaMā. 98.9.

**अन्वितप्रतिपादनशक्ति** (anvitapratipādana-śakti) *f.* expressive power of conveying the semantically related (meanings) पदानान्तावत्पदार्थाभिधान-शक्तिः अर्थानाञ्चान्वितप्रतिपादनशक्तिः पदानाञ्च ... कल्पनागौरवात् वरमेकेव पदानामन्वितगोचरा शक्तिरभ्युपगता NyāyRaMā. 79.15.

**अन्वितप्रतीति** (anvita-pratīti) *f.* knowledge of the semantically related (meanings) अन्विताभिधायित्वे हि पदानामवश्यमेव विशेषणभूतोऽप्यन्वयोऽ-भिधातव्यः। अन्यथान्वितप्रतीतेरुत्पत्त्ययोगात् NyāyRaMā. 81.23; सर्वेषां तु ... सर्वशब्दानाम् ... कश्चिदन्विताभिधायी स्यात्। तत्रान्वितप्रतीतिः कथं सिद्ध्येत् ŚāstrDī. 17.8 (*on* i.1.1); अभिहितान्वयवादे स्मृतेभ्यः पदार्थेभ्य अन्वितप्रतीतिः TantrRaha. 35.18.

**अन्वितप्रत्यायक** (anvita-pratyāyaka) *adj.* producer of the knowledge of semantically related (meanings) पदानान्त्वत्यन्ताक्लृप्तमेवान्वितप्रत्यायकत्वं कल्प्यम् NyāyRaMā. 96.6.

**अन्वितप्रत्यायन** (anvita-pratyāyana) *n.* production of the knowledge of semantically related (meanings) अथान्विताभिधानेऽप्यन्वितप्रत्यायनाय किमस्ति संबन्धान्तरं पदानाम् TattvBi. 160.16.

**अन्वितबोधकता** (anvitabodhaka-tā) *f.* [Inst.] by way of producing the knowledge of the semantically related (meanings) लौकिकं वैदिकं च पदजात-मन्वितबोधकतयैव प्रमाणमिति सिद्धम् TantrRaha. 35.26.

**अन्वितबोधकत्व** (anvitabodhaka-tva) *n.* the state of producing the knowledge of the semantically related (meanings) गौणलाक्षणिकयोस्तु प्रतियोगि-मात्रोपस्थापकत्वमेव। नान्वितबोधकत्वम् TantrRaha. 33.27.

**अन्वितबोधन** (anvitabodhana) *n.* act of producing the knowledge of the semantically related (meanings) यथा यथा सन्निधानं जायते प्रतियोगिनाम्। तथा तथा क्रमेणैव शब्दैरन्वितबोधनम् PrakaPañ. 390.17.

**अन्वितभावनाशाब्दत्व** (anvitabhāvanā-śābdatva) *n.* verbality of cognition of the semantically related activity तिबादिप्रत्ययस्यापि कार्यान्वितभावना-शाब्दत्वमन्वितभावनाशाब्दत्वं वेति वक्ष्यते LaCandr. 665.40.

**अन्वितभेद** (anvita-bheda) *m.* difference from the semantically related (meanings) सामान्यतोऽन्वितभेदस्य धीस्थता(v.l. धीस्तथा)स्तु NayaVi. 276.5 (*on* i.1.26); अन्वितभेदाद्वाक्यभेदः स्यात् YuktiSneha. 153.35 (*on* i.1.7)

**अन्वितभेदावस्था** (anvitabhedāvasthā) *f.* condition of difference from the semantically related (meanings) अन्वितभेदावस्था सम्बन्धिनी न पूर्वदृष्टेति चेत् NayaVi. 276.4 (*on* i.1.26)

**अन्वितभोग्य** (anvita-bhogya) *n.* distance of arc (of moon) which is